# वाक्यपदीयोक्तव्याकरणदर्शने मोक्षस्वरूपविमर्शः

**विन्ध्येश्वरीप्रसादमिश्रो 'विनयः'**

**वाङ्मयीसंसतिर्यस्य प्रभयैवप्रवर्तिता।**
**तं परात्परमात्मानमनिर्वाच्यमुपास्महे।।१।।**
**नुमस्तां वाक्कलामाद्यामात्मोल्लासमयीं शिवाम्।**
**यया र्थवत्वमासाद्य जगदेतच्छिवायते।।२।।**
**चतुर्वर्गस्य पर्यन्तप्रस्थानस्थानमीप्सिम्।**
**शास्त्रराद्धान्तनिःस्यन्दं पुमर्थं परमं नुमः।।३।।**
**श्रीभर्तहरिप्रोक्ते वाक्यपदीयस्य दर्शनेरम्ये।**
**मोक्षस्य यत्स्वरूपं तस्य विमर्शोयथामति क्रियते।।४।।**

अथ नापह्नुतमेतत्तज्ज्ञानां तज्ज्ञानावलोकावलोकनचक्षुष्मतां परिणतप्रज्ञानां यच्छब्दब्रह्मदर्शनशेवधिभूतमिदानीमुपलभ्यमाणग्रन्थजातेष्वन्यतमं प्रथमञ्च परमवैयाकरणश्रीमद्भर्तहरिचरणसन्दब्धं ब्रह्मवाक्यपदेत्युपलक्षितकाण्डत्रयात्मकं ग्रन्थरत्नं वाक्यपदीयं नाम।

तत्र शब्दशास्त्रस्य छन्दो ङ्गतां कक्षीकुर्वन्तो प्याचार्याः[1] शास्त्रमिदमपवर्गस्य द्वारभूतं किञ्च मुमुक्षूणां सरलमविरलं राजवर्त्मेत्यप्युद्भावयाञ्चक्रुः–

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।**[2]

इति,

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।**[3]

इति च वचनोपन्यासेन।

**तदेतद्विचार्यते** – शब्दशास्त्रमिदं मोक्षसाधनं साक्षाद्वा परम्पराया वा ? प्रथमं न सङ्घटते, शास्त्रस्यास्य वेदाङ्गत्वात् तत्त्वाधिगमपरमायाश्छन्दोमय्या वाचः प्रत्यस्तमित भेदरुपायास्वरूपाविष्करणैकलक्ष्यत्वाच्च, यथा –

**प्राप्तरूपविभागाया यो वाचः परमोरसः।**
**यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गो यमाञ्जसः।।**[4]

इत्यत्र, अथवा –

**अत्रातीतविपर्यासः केवलामनुपश्यति।**
**छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम्।।**[5]

इत्यस्मिन्नेतदेव प्रतिपादितत्वात्। द्वितीयं चेत्तदपि वेदानां मौलिस्थानत्वेनोपलक्षितानामथचतत्परमार्थभूतानामुपनिषदां प्रतिपादित–मोक्षस्वरूपादविलक्षणत्वनिरूपण प्रवणत्वान्नप्रस्थानान्तरत्वोपयिकत्वमित्यु–भयतःपाशा रज्जुस्तत्को यं शाब्दिकानां मोक्षो पवर्गो वा ?

वेदार्थपर्यन्तभूतासूपनिषत्सु त्वनेकत्र –

**न तत्र चक्षुर्गच्छति न वाग्गच्छति**[६]
**यद्वाचानभ्युदितं येन वागभ्युद्यते।**
**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते।।**[७]
**यतो वाचो निवर्तन्ते अप्राप्यमनसा सह।**
**आनन्दं ब्रह्मणो विद्वान्नबिभेति कदाचन।।**[८]

इत्यादिषु सर्वत्र परब्रह्मणि शब्दस्याकिञ्चित्करतैवा म्नाता, अपि च मैत्रायण्युपनिषदि–

**द्वे वाव ब्रह्मणी अभिध्येये ब्रह्मश्चाशब्दश्चाथ, शब्देनैवाशब्दमा-विष्क्रियेते थ तत्रोमिति शब्दो ननोर्ध्वमुत्क्रान्तो शब्दे निधनमेति**[९]

तत्रैव चाग्रे –

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।**[१०]

इत्येवमादिषु शब्दब्रह्मणो परब्रह्मता पि विस्पष्टमुक्ता, अपि च, ''**आत्मा वा अरे द्रष्टव्यः**''[११] **तमेव विदित्वा तिमत्युमेति**[१२]........... इत्यादि–श्रुतिवर्णेषु परब्रह्मसाक्षात्कारस्यैव मोक्षहेतुतोपपादिता इत्थं –

**यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।**
**तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते।।**[१३]

इत्यत्र निरूपिता व्याकरणद्वारेण साक्षात्परब्रह्मावाप्तिरूपमोक्षरूपता कथं सङ्घटतेः ?

वेदान्तदशा जाग्रदवस्थायां स्वप्ने पि चेत्यवस्थाद्वय एव शब्दप्रसक्तिः, सुषुप्तौ, सुषुप्त्युत्थितपरामर्शस्य स्मरणरूपाच्छब्दानुवेधपरत्वं नास्तीति प्रथितैवेयं वाचोयुक्तिः –

''**सुखमहमस्वाप्सं न किञ्चिदवेदिषम् मामपि नाज्ञासिषम्।** इति

अत्र मोक्षसुखस्य शब्दानुवेधसहित्यमनिर्वाच्यत्वञ्चाभ्युपेतं दश्यते। इत्थं यदि सुषुप्ता वेव शब्दो प्रसक्तः कथं तुर्यामवस्थायामेतस्य प्रसरः ? वयं तु ब्रूमः– हरिवषभेण भगवता शब्दशास्त्रय या दार्शनिकी भित्तिर्व्यवस्थापिता सा नास्ति श्रुतिसिद्धान्तविपरीता, तत्रापि श्रुतिकदम्बे

बहुत्र प्रणवरूपस्य शब्दब्रह्मणः सर्वकारणपरत्वप्रतिपादनप्रसङ्गाद् यथाहि – ओमित्येतदक्षरमिदं ँ, सर्वम्। तस्योपव्याख्या–

**नं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव।**
**यच्चान्यत्त्रिकालातीतं तदथोङ्कार एव।**[१४]
**ओमिति ब्रह्म। ओमितीदँ,सर्वम्।**[१५]
**ओमित्येतदक्षरमुद्गीथमुपासीत।**[१६]

किन्त्वेतत्प्रतिपादनं सष्टिसापेक्षं सगुणब्रह्मौपयिकमेवेति तत्र–तत्र निर्गुणस्याशब्दरूपाव्यवहार्यनिर्देशदर्शनादिति निश्चिनुमः।

शब्दब्रह्मरूपः प्रणवस्त्रिमात्रिको जाग्रत्स्वप्नसुषुत्यु व्यवहार्यः [१७] अव्यवहार्यश्चावस्थात्रयातीतो मात्रिको निर्वाच्यस्तदाह माण्डूक्यश्रुतिरेव –

**अमात्रश्चतुर्थो व्यवहार्यः प्रपञ्चोपशमः शिवो द्वैत एवमोङ्कार आत्मैव.....।**[१८]

व्याकरणं मूलतया प्रवत्तिशास्त्रं प्रयोगपरत्वात्। प्रवत्तौ पुनः सर्वस्मिन्नप्यर्थे शब्दस्यैवानुविद्धत्वं, यथा ह, भगवान्भर्तहरिः –

**न सो स्ति प्रत्ययो लोके**
**यः शब्दानुगमादते।**
**अनुविद्धमिवज्ञानं**
**सर्वं शब्देन भासते।।**[१९]

इति। प्रत्यवमर्शस्वरूपिणी वाग्रूपतैव संसारिणां बहिरन्तर्व्यश्नुवाना चिद्रूपासञ्ज्ञा, सैव वैखरीमध्यमापश्यन्तीत्यभिहिता स्फोटरूपा ध्वन्यभिव्यङ्ग्या व्यवहारमूला प्रक्रियात्वमुपेत्य जगदिति स्वरूपमाप्य विराजते। विश्वस्य निबन्धिनी परमात्मनः शक्तिः शब्दाश्रितैवेत्थं व्याकरणदर्शनस्य प्रवत्तिनिमि– त्तत्वं जगदुदिश्यैव न तत्तिरोधानमूलमुपनिषदादिवदिति निश्चेयम्। अपि च,

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्त्तते र्थभावेन प्रक्रिया जगतो यतः।।**[२०]

इत्यत्र यच्छब्दे पञ्चम्यर्थकतसिल्प्रत्यययोगदर्शनाद् ब्रह्मणस्तटस्थ लक्षणत्वमेवाभ्युपगन्तव्यं, **जन्माद्यस्य यतः** [२१] इति शारीरकसूत्रवदिति नः प्रतिपत्तिः।

वेदोक्त, **'चत्वारिश्रङ्गा'** [२२] इति मन्त्र व्याख्यानावसरे माहभाष्यकद्– भगवान् पतञ्जलिः –

महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम् [२३] इत्येवमुदीरयामास। अत्र कैयटः –

**महता परेण ब्रह्मणेत्यर्थः इति व्याचरण्यौ, ब्रह्मणा - शब्दब्रह्मणेति** नागेशः व्याकरोति, हरिरपि –

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**
**प्राहुर्महान्तमषभं येन सायुज्यमिष्यते।।**[२४]

इत्युक्तवान्।

अतः व्याकरणदर्शनोक्तो मोक्षः सगुणब्रह्मतादात्म्यापतिरेव, तत्र सायुज्यशब्ददर्शनात्। किञ्च वैयाकरणानां परब्रह्मता पि पारिभाषिकी शब्दोपहितपरमात्मनः प्रत्येव समुद्दिष्टत्वादित्युभयथा पि न श्रुतिनिर्ग–लितार्थव्याकोप इति दिक्।

*वाराणसीस्थकाशीहिन्दूविश्वविद्यालयस्य संस्कतविद्याधर्म–*
*विज्ञानसङ्कार्ये, वैदिकदर्शनविभागे आचार्यः*

**सन्दर्भाः**

---

[१] आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।। (वाक्यपदीये १/११)

[२] तत्रैव १/१४

[३] तत्रैव १/१६

[४] तत्रैव १/१२

[५] तत्रैव १/१७

[६] केनोपनिषत् १/३

[७] केनोपनिषत् १/५

[८] तैत्तिरीयोपनिषत् ४/१

[९] मैत्रा० १/२२

[१०] तत्रैव

[११] बहदारण्यक० ४/५/६

[१२] श्वेताश्वतरोपनिषदि ३/८, ६/१५

[१३] वाक्यपदीये १/२२

[१४] माण्डूक्योपनिषदि १/१

[१५] तैत्तिरीय० ८/१

[१६] छान्दोग्य० १/१/१

[१७] माण्डूक्य० १/६, १०,११

[१८] माण्डूक्य० १/१२
[१९] वाक्य० १/१२३
[२०] वाक्य १/१
[२१] ब्रह्मसू० १/१/२
[२२] ऋग्वेदे ४/५८/३
[२३] महाभाष्ये, पश्पशाह्निके...
[२४] वाक्यपदीये १/१३१

———०००———